# Nārāyaṇa Sūktam

[KYV TA 4-10-13]

ॐ धाता पुरस्ताद् यमुदाजहार । शक्रः प्रविद्वान्प्रदिशश्चतस्रः ।

ॐ dhātā puras’tād’ yamudājahāra |
śhak’ra[fp]’ pravid’vān’pradiśhaśh’chatas’raḥa |

तमेवं विद्वानमृत , इह भवति । नान्यः पन्था , अयनाय विद्यते ।

tamēvaṁ’ vid’vānamṛta , iha bhavati |
nān’ya[fp]’ pan’thā , ayanāya vid’yatē |

सहस्रशीर्षं देवं विश्वाक्षं विश्वशम्भुवम् ।
विश्वं नारायणं देवमक्षरं परमं पदम् ॥ १ ॥

sahas’raśhīr’ṣhan’ dēvaṁ’ viśh’vāk’ṣhaṁ’
viśh’vaśham’bhuvam |
viśh’van’ nārāyaṇan’ dēvamak’ṣharam’
paramam’ padam || 1 ||

विश्वतः परमान्नित्यं विश्वं नारायणꣳ हरिम् ।
विश्वमेवेदं पुरुषस्तद्विश्वमुपजीवति ॥ २ ॥

viśh’vata[fp]’ paramān’nit’yaṁ’
viśh’van’ nārāyaṇagm’ harim |
viśh’vamēvēdam’ puruṣhas’tad’viśh’vamupajīvati || 2 ||

पतिं विश्वस्याऽऽत्मेश्वरꣳ शाश्वतꣳ शिवमच्युतम् ।
नारायणं महाज्ञेयं विश्वात्मानं परायणम् ॥ ३ ॥

patiṁ’ viśh’vas’yā (ā)t’mēśh’varagm’
śhāśh’vatagm’ śhivamat’chyutam |
nārāyaṇam’ mahāj’ñēyaṁ’
viśh’vāt’mānam’ parāyaṇam || 3 ||

www.SaiVeda.net

नारायण परो ज्योतिरात्मा नारायणः परः ।
नारायणपरं ब्रम्ह तत्त्वं नारायणः परः ॥४॥

nārāyaṇa parōj' jyōtirāt'mā nārāyaṇa[fp]' paraḥa ।
nārāyaṇa param' bram'ha tat'tvan'
nārāyaṇa[fp]' paraḥa ॥ 4 ॥

नारायण परो ध्याता ध्यानं नारायणः परः ।
यच्च किञ्चिज्जगत्सर्वं दृश्यते श्रूयतेऽपि वा ॥५॥

nārāyaṇa parōd' dhyātād'
dhyānan' nārāyaṇa[fp]' paraḥa ।
yat'cha kiñ'chij' jagat'sar'van'
dṛśh'yatēēśh' śhrūyatē (a)pi vā ॥ 5 ॥

अन्तर्बहिश्च तत्सर्वं व्याप्य नारायणः स्थितः ।
अनन्तमव्ययं कविꣳ समुद्रेऽन्तं विश्वशम्भुवम् ॥६॥

an'tar'bahiśh'cha tat' sar'vaṁ'
vyāp'ya nārāyaṇas' sthitaḥa ।
anan'tamav'yayaṅ' kavigm'
samud'rē (a)n'taṁ' viśh'va śham'bhuvam ॥ 6 ॥

पद्मकोश प्रतीकाशꣳ हृदयं चाप्यधोमुखम् ।
अधो निष्ठ्या वितस्त्यान्ते नाभ्यामुपरि तिष्ठति ॥७॥

pad'makōśhap' pratīkāśhagm'
hṛdayañ' chāp'yadhōmukham ।
adhō niṣh'ṭyā vitas'tyān'tē
nābh'yāmupari tiṣh'ṭhati ॥ 7 ॥

www.SaiVeda.net

ज्वालमालाकुलं भाती विश्वस्याऽऽयतनं महत् ।
सन्ततꣳ शिलाभिस्तुलम्बत्याकोशसन्निभम् ॥८॥

jvālamālākulam' bhātī viśh'vas'yāyatanam' mahate ।
san'tatagm' śhilābhis'tu
lam'bat'yākōśhasan'nibham ॥ 8 ॥

तस्यान्ते सुषिरꣳ सूक्ष्मं तस्मिन्थ्सर्वं प्रतिष्ठितम् ।
तस्य मध्ये महानग्निर्विश्वार्चिर्विश्वतोमुखः ॥९॥

tas'yān'tē suṣhiragm' sūk'ṣhman'
tas'min'n'thsar'vam' pratiṣh'ṭhitam ।
tas'ya madh'yē mahānag'nir'
viśh'vār'chir'viśh'vatōmukhaḥa ॥ 9 ॥

सोऽग्रभुग्विभजन्तिष्ठन्नाहारमजरः कविः ।
तिर्यगूर्ध्वमधश्शायी रश्मयस्तस्य सन्तता ॥१०॥

sō (a)g'rabhug'vibhajan'tiṣh'ṭhan'
nāhāramajara[hk]' kaviḥi ।
tir'yagūrdh'vamadhaśh'śhāyī
raśh'mayas'tas'ya san'tatā ॥ 10 ॥

सन्तापयति स्वं देहमापादतलमस्तकः ।
तस्य मध्ये वन्हिशिखा , अणीयोर्ध्वा व्यवस्थितः ॥११॥

san'tāpayatis' svan' dēhamāpādatalamas'takaḥa ।
tas'ya madh'yē van'hiśhikhā ,
aṇīyōōrdh'vāv' vyavas'thitaḥa ॥ 11 ॥

www.vedavms.net

नीलतोयदमध्यस्थाद्विद्युल्लेखेव भास्वरा ।
नीवारशूकवत्तन्वी पीता भास्वत्यणूपमा ॥ १२ ॥

nīlatōyada madh’yas’thād’ vid’yul’lēkhēva bhās’varā |
nīvāraśhūkavat’tan’vī pītā bhaās’vat’yaṇūpamā || 12 ||

तस्याः शिखाया मध्ये परमात्मा व्यवस्थितः ।
स ब्रम्ह स शिवः स हरिः सेन्द्रः सोऽक्षरः परमः स्वराट् ॥ १३ ॥

tas’yāāśh’ śhikhāyā madh’yē
paramāāt’māv’ vyavas’thitaḥa |
sab’ bram’ha sa śhivas’ sa haris’ sēn’dras’
sō (a)k’ṣhara[fp]’ paramas’ svarā-ṭe || 13 ||

ऋतꣳ सत्यं परं ब्रम्ह पुरुषं कृष्णपिङ्गलम् ।
ऊर्ध्वरेतं विरूपाक्षं विश्वरूपाय वै नमो नमः ॥ १४ ॥

ṛtagm’ sat’yam’ param’
bram’ha puruṣhaṅ’ kṛṣh’ṇapiṅ’galam |
ūr’dhvarētaṁ’ virūpāk’ṣhaṁ’
viśh’varūpāya vai namō namaḥa || 14 ||

नारायणाय विद्महे वासुदेवाय धीमहि ।
तन्नो विष्णुः प्रचोदयात् ॥ १५ ॥

nārāyaṇāya vid’mahē vāsudēvāya dhīmahi |
tan’nō viṣh’ṇu[fp]’ prachōdayāāte || 15 ||

ॐ शान्तिः शान्तिः शान्तिः ॥

ॐ śhā-n’tiśh’ śhā-n’tiśh’ śhā-n’tiḥi ||

www.SaiVeda.net